# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, नवम्बर्-दिसम्बर्-२०१६

| | | |
|---|---|---|
| कक्षा- शास्त्री-२ (SEM-3) | प्रश्नपत्र-८ | गुणाः - ७० |
| विषयः- साहित्यम् | CE-236 | समयः - ०३ तः ०६ |
| दिनाङ्कः - ०२/१२/२०१६ | सन्दर्भग्रन्थः - वेणीसंहारनाटकम् | |

**॥ प्रथमान्वितिः ॥**

**प्र-१ द्वयोः श्लोकयोः सप्रसङ्गं व्याख्या कार्या । ०८**

१. श्रवणाञ्जलिपुटपेयं विरचितवान्भारताख्यममृतं यः ।
तमहमरागमकृष्णं कृष्णद्वैपायनं वन्दे ॥

२. मथ्नामि कौरवशतं समरे न कोपाद् दुःशासनस्य रुधिरं न पिबाम्युरस्तः ।
सञ्चूर्णयामि गदया न सुयोधनोरु सन्धिं करोतु भवतां नृपतिः पणेन ॥

३. स्त्रीणां हि साहचर्याद्भवन्ति चेतांसि भर्तृसदृशानि ।
मधुराणि हि मूर्च्छ्यते विषविटपि समाश्रिता वल्ली ॥

**प्र-२ वेणीसंहनाटकम् - रचनाकारस्य जीवनपरिचयं तथा तेषां कृत्तित्वं लिखत । ०८**

**अथवा**

**प्रथमाङ्कस्य सारं लिखन्तु ।**

**प्र-३ द्वयोः टिप्पणी कार्या । ०४**

१. कृष्णां धूमशिखामिव - भावार्थं स्पष्टयतु ।

२. भीमसेनस्य चरित्रचित्रणम् ।

३. चञ्चद्भुजभ्रमित - इति श्लोकस्य भावं प्रकटयतु ।

४. सन्धि हेतवे भीमस्य विचारं प्रस्तुयतु ।

**प्र-४ पञ्चानाम् एकवाक्येन उत्तराणि लिखत । ०५**

१. वेणीसंहारनाटकस्य प्रथमाङ्के कति श्लोकाः सन्ति?

२. वेणीसंहारनाटके कति अङ्काः सन्ति?

३. भट्टनारायणस्य कति नाटकानि सन्ति?

४. दुर्योधनस्य पत्न्याः नाम किम्?

५. संहारः - इत्यस्य कोऽर्थः?

६. द्रोणाचार्यस्य पुत्रस्य नाम किम्?

७. व्यासस्य पूर्णं नाम किम्?

**॥ द्वितीयान्वितिः ॥**

**प्र-५ द्वयोः श्लोकयोः सप्रसङ्गं व्याख्या कार्या । ०८**

१. सहभृत्यगणं सबान्धवं सहमित्रं ससुतं सहानुजम् ।
स्वबलेन निहन्ति संयुगे न चिरात्पाण्डुसुतं सुयोधनः ॥

२. कुरु धनोरु पदानि शनैः शनैरपि विमुञ्च गति परिवेपिनीम् ।
सुतनु बाहुलतोपनिबन्धनं मम निपीड्य गाढमुरःस्थलम् ॥

३. धर्मात्मजं प्रति यमौ च कथैव नास्ति मध्ये वृकोदरकिरीटभृतार्बलेन ।
एकोऽपि विस्फुरितमण्डलचापचक्रं कः सिन्धुराजमभिषेणयितुं समर्थः ॥

**प्र-६ वेणीसंहारनाटके कस्य रसस्य प्राधान्यता अस्ति? सोदाहरणं वर्णयतु ।** **०८**

**अथवा**

**द्वितीयाङ्कस्य सारांशं लिखतु ।**

**प्र-७ कस्यचिदेकस्य टिप्पणी कार्या ।** **०२**

१. कञ्चुक्याः नीतिवर्णनम् ।

२. भानुमत्याः स्वप्नवृत्तम् ।

**प्र-८ लघूत्तरीयौ द्वौ प्रश्नौ समाधेयौ ।** **०२**

१. द्वितीयेऽङ्के कति श्लोकाः सन्ति?

२. भानुमत्याः का सखी?

३. पातुं वाञ्छा परमसुलभं कि न दुर्योधनस्य – कस्योक्ति?

**॥ तृतीयान्वितिः ॥**

**प्र-९ श्लोकद्वयं ससन्दर्भं व्याख्यायत ।** **०८**

१. महाप्रलयमारुतक्षुभितपुष्करावर्तकप्रचण्डधनगर्जितप्रतिरवानुकारी मुहुः ।
रवः श्रवणभैरवः स्थगितरोदसीकन्दरः कुतोऽद्य समरोदधेरयमभूतपूर्वः पुरः ॥

२. कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं मनुजपशुनिर्मयादैर्भवद्भिरुदायुधैः ।
नरकरिपुणा सार्धं तेषां सभीमकिरीटीनामयमहमसृङ्भेदो मांसैः करोमि दिशां बलिम् ॥

३. कथमपि न निषिद्धो दुःखिना भीरुणा वा द्रुपदतनयपाणिस्तेन पित्रा ममाऽद्य ।
तव भुजबलदर्पाध्मायमानस्य वामः शिरसि चरण एष न्यस्यते वारयैनम् ॥

**प्र-१० एकस्य विवरणं कुिरुत ।** **०८**

१. राक्षसी-राक्षसयोः संवादः ।

२. तृतीयाङ्कस्य सारं लिखन्तु ।

**प्र-११ द्वयोः टिप्पणी विधेया ।** **०४**

१. कर्ण-अश्वत्थाम्नोः संवादः ।

२. दुर्योधनस्य चरित्रचित्रणम् ।

३. किमर्थं द्रोणाचार्येण शस्त्रत्यागः कृतः?

४. कृपस्य शीलवर्णनम् ।

**प्र-१२ पञ्चप्रश्नाः एकवाक्येन समाधेयाः ।** **०५**

१. तृतीयाङ्के कति श्लोकाः सन्ति?

२. अश्वत्थामा हत इति केन कथितम्?

३. पृथापुत्रस्य कोऽर्थः?

४. प्रत्ययात् शब्दस्य कोऽर्थः?

५. द्रोणस्य सारथिः कः?

६. सर्वं तदेकपद एव कथं निरस्तम् – इति कस्योक्तिः?

७. अश्वत्थामा तृतीयाङ्के कां प्रतिज्ञां करोति?